Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 6 | ISSN : 2582-0095

# ब्रह्मणः सृष्टौ सर्वोत्कृष्टं चारित्र्य विकासे भर्तृहरेः अवदानम्

डॉ. सीता राम शर्मा
प्रोफेसर (साहित्य) राजकीय धुलेश्वर आचार्य, (पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)

**शोधसारांशः**- संस्कृतसाहित्ये चारित्र्यविकासार्थं मार्गदर्शनस्य प्राचुर्यं विद्यते । काव्येषु विशेषतया नाटकेषु च सदाचारपूरितानि अनेकानि तथ्यानि समुपलभ्यन्ते । अन्यत्रापि नैयून्यं नास्ति। परन्तु भर्तृहरेः नीतिशतके एकत्र मनुस्मृतिसदृशी शिक्षा, महाभारतसदृशोपदेशः, पुराणसदृशरसास्वादनं दर्शनसदृशतर्कशीलता दृश्यते, अपरत्र कालिदासस्योपमा, दण्डिनः पदलालित्यं, भारवेः अर्थगाम्भीर्यञ्च समुपलभ्यते । नीतिशतकं मानवमात्रस्य कृते मधुरम् औषधं वर्तते । आबालवृद्धाः सर्वेऽपि विना कष्टं आनन्देन अस्य पानं कर्तु प्रभवन्ति । कविवरेण भर्तृहरिणा नीतिशतकमाध्यमेन विशिष्टमेकं जीवनदर्शनं प्रदत्तम् । अस्य पद्यानि प्रतिपदमस्मान् प्रहरीत्वेन प्रबोध्य योग्यमार्गमानीय दिव्यं भव्यञ्च जीवनं जीवितुं प्रेरयति । अनेन मानवः किंकर्त्तव्यविमूढदशायामपि सरलं सुगमं च मार्गं प्राप्नोति । ग्रन्थोऽयं न केवलं संस्कृतज्ञानाम् अपितु सर्वेषां प्रियतमं कण्ठाभरणं विद्यते।

**मुख्यशब्दाः**- मानवः, गुणाः, भर्तृहरि, नीतिशतकम्, मुक्तककाव्यम्, चिन्तनशील : ।

---

**अस्मिन् लेखे मनुष्यस्य चारित्र्यमहत्त्वम्, विवेकमूलम्, सज्जनप्रशंसा, दुर्जननिन्दा इत्यादिविषयाः सम्यक् उपवर्णिताः सन्ति ।**

ब्रह्मणः सृष्टौ सर्वोत्कृष्टं स्थानं भवति मानवस्य यतः मानवः चिन्तनशील : विवेकशीलश्च वर्तते । पूर्वं कृतस्य कार्यस्य परिणामं परिशील्य अग्रे करणीयकार्यस्य दशां दिशां च सुविचिन्त्य निर्धारयति मानवः । प्रतिपलं शिक्षणमवाप्य असौ आत्मपरिष्कारं विदधाति । सततम् अग्रे गमनं मानवस्य सहजः स्वभावः भवति । एतदर्थं यद् यद् आवश्यकं भवति तत्सर्वं साधयति मनोः सन्ततिः ।

वेदादिविविधविद्याः अनादिकालादेव सम्पूर्णचराचरजगति अनुस्यूततया विकास– मन्दाकिनीं प्रवाहयन्ति। मानवस्य चारित्र्यविकासे व्यवहारज्ञानस्य महती भूमिका वर्तते । विविधप्रसङ्गेषु अस्माभिः क्रियमाणः व्यवहारः एव अस्माकं विकासस्य परिचायकः भवति । इदं च व्यवहारज्ञानम् अत्यन्तं सरलरीत्या प्रायेण काव्येनैव सम्भवति। समन्वयवादी काव्यशास्त्री आचार्यमम्मटोऽपि काव्यप्रयोजनमुपस्थापनकाले व्यवहारज्ञानाय आग्रहं प्रदर्शयति–

**काव्यं यशशेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**

**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।'**

काव्यपरम्परायां नीतिकाव्यानि अत्यन्तं प्रथितानि विद्यन्ते । नीतिकाव्यस्य नामोच्चारणमात्रेणैव भर्तृहरिः स्मृतिपथमायाति । स्वकाव्यप्रतिभया ज्ञानेन च लब्धप्रतिष्ठस्य भर्तृहरेः जन्मदेशकालादिविषये सप्रमाणम् इदमित्थं वक्तुं तथ्यानि नैव समुपलभ्यन्ते । विदुषां मतानुसारेण भर्तृहरिः मालवदेशस्य राजा आसीत् । अस्य पिता महाराजः गन्धर्वसेनः अनुजश्च महाराजः विक्रमादित्यः आसीत् । अस्य पत्न्याः नाम पिङ्गला आसीत् । अयं कालक्रमेण वैराग्यमवाप्य राज्यशासनदायित्वम् अनुजाय समर्प्य गोरखनाथस्य शिष्यत्वं प्राप्य योगी अभवत् । नीतिशतकम्, शृङ्गारशतकम्, वैराग्यशतकम्, वाक्यपदीयञ्चेति अस्य प्रसिद्धाः रचनाः सन्ति । किन्तु शतकत्रयस्य कर्त्ता भर्तृहरिरेव वाक्यपदीयस्य च कर्त्ता वेत्यत्र विद्वत्सु अभिप्रायभेदोऽपि दृश्यते ।

भर्तृहरेः नीतिशतकं मुक्तककाव्यं वर्तते । मुक्तके प्रत्येकमपि श्लोकः अर्थदृष्ट्या स्वतन्त्रो भवति । अर्थावबोधाय पूर्वापरप्रसङ्गस्य न कापि अपेक्षा भवति । नीतिशतके एतादृशाः शतं श्लोकाः सन्ति । ग्रन्थेऽस्मिन् भर्तृहरिः स्वानुभवसिद्धान् बहून् विचारान् श्लोकरूपेण

प्रास्तौत्। सः अनेन माध्यमेन जीवनोपयोगीनि नैतिकमूल्यानि अशिक्षयत्। अस्मिन् पदलालित्यम् अर्थगाम्भीर्यं दृष्टान्तञ्च अत्यन्तं हृदयग्राह्यं वर्तते । संस्कृतवाङ्मये सत्सु अपि बहुषु नीतिग्रन्थेषु भर्तृहरिप्रणीतः नैतिकविचारविस्फोरकः सुभाषित– समुच्चयात्मकः अयं ग्रन्थः विशिष्टं स्थानं भजते ।

नीतिशतके उत्कृष्टाः नैतिकसिद्धान्ताः प्रतिपादिताः सन्ति । एते सिद्धान्ताः विशिष्टजातिवर्ग क्षेत्रभाषासम्प्रदायसम्बद्धाः न सन्ति । अत्रत्यः प्रतिपाद्यविषयः लोकव्यवहारकौशल्यं बोधयति । अनेनैव अस्माकं चारित्र्यविकासः सम्भवति । अत्रत्याः सर्वे विषयाः मानवस्य गम्भीरसांसारिकानुभवाधारिताः सन्ति । व्यवहारजगति के गुणाः आवश्यकाः, कीदृशी च जीवनशैली अपेक्षिता इति समीचीनरीत्या अस्मिन् निरूपितं विद्यते । नीतिशतकेऽस्मिन् अस्माकं चारित्र्यविकासाय विवेचितानां विषयाणां दिङ्मात्रमत्र निरूपणं विधीयते ।

चीनयात्रिणः इत्सिंगस्य यात्राविवरणेन ज्ञायते यत् 651 तमे खैष्टाब्दे भर्तृहरिनामकस्य कस्यचित् वैयाकरणस्य मृत्युः अभवत् । तदनुसारेण अस्य कालः सप्तम्यां शताब्द्यां सम्भाव्यते, परन्तु भारतीयपुराणेषु सन्दर्भेऽस्मिन् न कोऽपि उल्लेखः प्राप्यते । तस्मात् प्रतिभाति यत् इत्सिंगद्वारेण वर्णितः भर्तृहरिः अन्यः कोऽपि स्यादिति ।

भर्तृहरिसम्बद्धाः किम्वदन्त्यः अपि श्रूयन्ते । अत्र किम्वदन्तीद्वयस्य उल्लेखः क्रियते । एकदा महाराजः भर्तृहरिः पत्न्या पिङ्गलया सह मृगयाविहारार्थं वनम् अगच्छत्। तत्र बहुकालं यावदितस्ततः अटनानन्तरमपि न कोपि वन्यप्राणी लब्धः । ततः प्रत्यागमनकाले मार्गे कश्चन मृगसमूहः समवलोकितः । राजा समूहस्य अग्रेसरं विलोक्य तं प्रहर्तुमुद्यतः । राजानं निवारयन्ती पिङ्गला अवदत् यदयं मृगराजः समग्रस्यास्य मृगसमूहस्य पालकः विद्यते । अत एव असौ न मारणीयः । परन्तु भर्तृहरिः पत्न्याः वचनमपरिगणय्य प्राहरत् । हरिणः भूमौ अपतत्। प्राणत्यागात् प्राक् राजानं भर्त्सयन् सः अकथयत् यत् भोः राजन् ! त्वया समीचीनं नाचरितम् । इदानीं यदहं वच्मि तत्त्वं परिपालय । मम मृत्योः परं मदीयं शृङ्ग शृङ्गिणे साधवे, मदीये चञ्चले नयने नार्यै, मदीयं चर्म तपस्विने, मदीयाः पादाः चोरेभ्यः, मदीयं मांसं च पापिने राज्ञे प्रयच्छ इति । हरिणस्य कारुण्यपूर्णं वचनं निशम्य भर्तृहरेः हृदयं द्रवीभूतम् । सः हरिणस्य मृच्छरीरम् अश्वे संस्थाप्य अग्रे प्रयातः । मार्गे तस्य मेलनं योगिना गोरक्षनाथेन सह अभूत् । राजा समग्रां घटनां योगिने विनिवेद्य हरिणाय जीवनं प्रदातुं तं न्यवेदयत्। राज्ञः वचनम् आकर्ण्य गोरक्षनाथेनोक्तं यत् हरिणाय अहं जीवनं प्रदास्यामि परन्तु त्वया मदीयशिष्यत्वेन भाव्यम् । तदनु भर्तृहरिः राज्यं परित्यज्य योगिनः शिष्यः सञ्जातः ।

भर्तृहरेः वैराग्यस्य विषये अपि काचित् किम्वदन्ती आकर्ण्यते । तदनुसारेण भर्तृहरेः समीपम् एकदा कश्चन साधुः समायातः । सः राज्ञे किञ्चिद् अमरफलं प्रदाय अवदत् यदिदं फलं खादित्वा भवान् अमरत्वं प्राप्तुमर्हतीति । महाराजस्य भर्तृहरेः अतिशयप्रीतिः राज्ञि आसीत् । तस्मात् सः स्वयम् अभुक्त्वा तत् फलं तस्यै अयच्छत् । राज्ञी सेनानायके प्रीणाति स्म, तस्मात् सा अपि फलम् अभुक्त्वा तस्मै सेनानायकाय दत्तवती । सः सेनानायकः तत्फलं स्वकीयप्राणप्रियायै राजनर्तक्यै प्रायच्छत्। राजनर्तक्याः प्रीतिभाजनः राजा भर्तृहरिः आसीत् । अत एव सा तत् फलं प्राप्य राज्ञे दातुमैच्छत् । सा राज्ञः सकाशं समागत्य तत् फलं तस्मै अर्पयत् । इत्थं राज्ञै प्रदत्तं फलं राजनर्तक्याः सकाशात् पुनः समवाप्य भर्तृहरिः स्तब्धः सञ्जातः । पृष्टायां सत्यां सा समस्तं वृत्तान्तमकथयत् । अस्याः घटनायाः महान् प्रभावः भर्तृहरेः मनसि समजनि । स च संसारस्य नश्वरतामभिज्ञाय अनुजाय विक्रमाय सम्पूर्ण राज्यं समर्प्य स्वयं संन्यासं स्व्यकरोत् ।

एतादृशीनां किंवदन्तीनां प्रामाण्यविषये इदमित्थं प्रतिपादयितुं नास्ति कश्चन अपरः मार्गः । परन्तु नीतिशतकस्य प्रारम्भिके श्लोके अपि भर्तृहरेः प्रेमविषयक : क्षोभः अस्माभिः अनुभवितुं शक्यते । अनेन प्रणीतेषु त्रिष्वपि शतकेषु अनेकानि पद्यानि स्वानुभूत्या परिप्लावितानि वर्तन्ते । तेषु आत्मदर्शनतत्त्वानि सर्वतोभावेन परिलक्ष्यन्ते ।..

भर्तृहरिः मुक्तककाव्यपरम्परायाम् अग्रगण्यः कविः विद्यते । सत्कवेः सर्वेऽपि गुणाः अस्य शतकत्रये दृश्यन्ते । अस्य भाषा सरला मधुरा सरसा मनोरमा प्रवाहमयी च वर्तते। भावाभिव्यक्तिश्च अत्यन्तं प्रभावोत्पादिका विद्यते। अत एव पाठकांनां मनः हृदयञ्च

अमन्दानन्दाप्लाविते भवतः । अस्मिन् छन्दसां वैविध्यं वर्तते । अनेन भावस्य विषयस्य चानुकूलं छन्दांसि उदाहरणानि च प्रयुक्तानि । भर्तृहरिणा प्रयुक्ताः सूक्तयः जनमानसे प्रचलिताः प्रथिताश्च सन्ति । अस्योपदेशः अस्माकं जीवने सार्वकालिकं मार्गदर्शनं विदधाति । नीतिशतके विषयोपस्थापनमतीव मनोवैज्ञानिकरीत्या कृतं विद्यते । अस्माभिः किं कर्त्तव्यं किं न कर्त्तव्यं किं ग्राह्यं किञ्च त्याज्यमिति विविधप्रसङ्गानामुपस्थापनेन सः बोधयति । अस्मिन् वर्णितानां विषयाणाम् विभागः इत्थं भवितुमर्हति - 1. विवेकस्य मूल्यम् 2. सज्जनप्रशंसा 3. दुर्जननिन्दा 4. मूर्खस्य स्वभाव : 5. विद्यामाहात्म्यम् 6. सद्गुणमहिमा 7. कर्मविचारश्च । एतदाधारेण कानिचन तथ्यानि अत्र उपस्थाप्यन्ते ।

**विवेकस्य मूल्यम्** – विस्वस्मिन् विश्वे सर्वोऽपि जनः सुखं शान्तिञ्च वाञ्छति । एतस्मिन् विवेकस्य भूमिका सुमहती भवति । मानवेषु अहङ्कारमदमोहादयः बहवो हि दोषाः सम्भवन्ति । एतादृशदुर्गुणभरितस्य जनस्य सर्वादौ विवेकः नष्टः भवति । तस्य मैत्री अपि तादृशैः विवेकहीनैः जनैस्सह एव भवति । विवेकराहित्येन दुर्जनसंसर्गेण लिप्सया च मानवीयागुणाः तस्मात् अपगच्छन्ति दानवीयगुणाश्च तस्मिन् समुद्भवन्ति । कर्त्तव्याकर्त्तव्यविवेकशून्याः शस्त्रान्विताः शक्तिसम्पन्नाः सर्वसमर्थाः अपि जनाः धर्ममार्गं परित्यज्य अधर्ममार्गमनुसरन्ति । रावणः कंसः जरासन्धः शिशुपालः दुर्योधनादयश्च अनेके तद्गुणसम्पन्नाः उदाहरणभूताः अस्मत्पुरतः दृश्यन्ते । अविवेकिनः ते दुरभिमानादेव समूलं विनष्टाः । अतः दुरभिमानं दूरीकृत्य विवेकपुरस्सरं जीवनयापनं मानवस्य परमं कर्त्तव्यं वर्तते । कविः भर्तृहरिः सन्देशमिदं देवनद्याः भागीरथ्याः दृष्टान्तपूर्वकं प्रस्तौति । सः कथयति यत् भगवती गङ्गा यथा स्वर्गात् शिवस्य शिरसि, ततः हिमाद्रौ, ततः पृथिव्यां ततश्च सागरं गच्छन्ती क्रमेण नीचौरेव अगच्छत्, तथैव विवेकभ्रष्टाः जनाः अत्युन्नतं पदं प्राप्य अपि अनेकप्रकारैः पतन्ति–

**शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं**

**महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।**

**अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा**

**विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥'**

**सज्जनप्रसंशा** - सज्जनाः परोपकारभावभरिताः भवन्ति । इतरेषां साहाय्येन ते स्वीयं जीवनं धन्यं मन्वते । सर्वेषु तेषां प्रेमभावः भवति । द्वेषात् क्लेशः समुद्भवति, तस्मात् ते ततः दूरे एव तिष्ठन्ति । कदाचिदपि ते द्वेषपूर्णव्यवहारं नैव कुर्वन्ति । सज्जनपुरुषाः कदापि आत्मप्रशंसां नेच्छन्ति अपितु इतरेषां प्रशंसां कुर्वन्ति । दृष्टिवैशाल्यं मनोवैशाल्यं हृदयवैशाल्यञ्च तेषां सहजगुणाः भवन्ति । सत्पुरुषाणां चरित्रं स्वस्य कृते वज्रादपि कठोरं इतरेषाञ्च कृते कुसुमादपि मृदु भवतीति महाकविः भवभूतिरपि प्रत्यपादयत्–

**वज्रादपि कठोराणि मृदूनि कुसुमादपि । '** सज्जनाः स्वयं कष्टं सोढ्वाऽपि परेषामुपकारं नैव त्यजन्ति । विपरीतदशायामपि सत्पुरुषाणां व्यवहारः संयमितः एव भवति । तेषामाचरणमेव तान् परिचाययति । सौजन्यं मानवस्य अलङ्कारः वर्तते, तद्विना चारित्र्यविकासः नैव सम्भवति । कविना भर्तृहरिणा सज्जनानां काश्चन मर्यादाः वर्णिताः । तदनुसारेण दुर्जनाः न याच्याः, सखाऽपि निर्धनः अस्ति चेत् न प्रार्थनीयः सर्वदा न्यायसम्मता आजीविका एव आश्रयणीया, विपत्तौ अपि उन्नतं जीवनविधानं नैव त्याज्यं प्राणसङ्कटेऽपि गर्हितं कार्यं न कर्त्तव्यम्, सुतीक्ष्णया असिधारया सममपि व्रतं कदाचिदपि नैव त्यक्तव्यम्–

**असन्तो नाऽभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः**

**प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्।**

**विपद्युच्चैः स्थेयं पदमनुविधेयं च महता**

**सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥**

**दुर्जननिन्दा -** मानवस्य कश्चन समाजः भवति । सामाजिकत्वात् सः एकाकी जीवनं कर्तुं नार्हति। समाजे बहुविधाः जनाः भवन्ति । भौगोलिकपरिवेषकारणात् न केवलं विदेशे अपितु भारतेऽपि मानवेषु स्वरूपभेदः दृश्यते । आकृत्या पश्यामश्चेत् सर्वेष्वपि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च समानानि एव भवन्ति । हस्तौ पादौ कर्णौ नेत्रे च सममेव दृश्यन्ते । परन्तु व्यवहारेण केचन सज्जनाः केचन अन्यविधाश्च भवन्ति । सज्जनाः सततं समाजस्य अभ्युदयं कामयन्ते । उन्नतिम् इच्छद्भिः अस्माभिः निश्चप्रचं सुजनानामेव संसर्गः विधेयः । चारित्र्यविकासस्य महत्त्वपूर्णः पक्षः भवति अस्मत्परितः विद्यमानानां जनानां सम्यग् अभिज्ञानम् । सन्दर्भेस्मिन् भर्तृहरेः मार्गदर्शनम् अत्यन्तं लाभदायकं वर्तते। सः उत्तममध्यमाधमानां त्रयाणां निरूपणं विधाय चतुर्थप्रकारस्यापि उल्लेखमकरोत् । तस्य मतेन प्रथमं स्थानं सत्पुरुषाणां वर्तते, ते अन्यस्य हितं साधयितुं स्वीयं हितं सहर्षं परित्यजन्ति । द्वितीयं स्थानं सामान्यजनानां विद्यते । मध्यमाः ते स्वीयं हितम् अपरित्यज्य इतरेषामपि हितं साधयन्ति । तृतीयं स्थानम् अधमानां भवति। ते अन्येषां हितं नाशयित्वा स्वार्थं साधयन्ति । एतदर्थं मनुष्येषु ते नरराक्षसाः इत्युच्यन्ते । अन्तिमं स्थानं तु तेषां भवति ये अकारणमेव परहितं नाशयन्ति। एतादृशानाम् अधमाधमानां परमनीचानां कोटिनिर्धारणेऽपि जिह्वा लज्जते-

**एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये**

**सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।**

**तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये**

**ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे । '**

अतः अवश्यमेव अस्माभिः अवधानतया जनाभिज्ञानं विधाय परस्परं व्यवहर्त्तव्यम् । अनेनैव विविधाभ्यः समस्याभ्यः वयं रक्षिताः स्याम । गोस्वामी तुलसीदासोपि बोधयति-

**बरु भल बास नरक कर ताता।**

**दुष्ट सङ्ग जनि देइ विधाता ॥**

**मूर्खस्य स्वभावः -** भर्तृहरिणा न केवलं सज्जनानां दुर्जनानाञ्च निरूपणं कृतम् अपितु मूर्खाणामपि विवेचनम् अतीव सूक्ष्मेक्षिकया कृतम्। लोके जनानाम् आनन्त्यं विद्यते । तेषु अक्षरसम्बन्धादपि कश्चन भेदः दृश्यते । सामान्यतया क्वचित् निरक्षराणां कृते मूर्खपदप्रयोगः श्रूयते । परन्तु वस्तुतथ्यं तथा नास्ति । अस्मद्देशे कस्मिंश्चित् कालखण्डे साक्षराणां सङ्ख्या न्यूनायिता इति सत्यम् । परन्तु अस्माकीनाग्रामीणपरम्परावलोकनेन ज्ञायते यत् निरक्षराणामपि समाजे मूल्यमासीत् । साक्षरः बुद्धिमान् निरक्षरश्च मूर्खः स्यादित्ययं भावः समीचीनः न प्रतिभाति। शास्त्राण्यधीत्यपि भवन्ति मूर्खाः इति वचनं सुप्रथितमेव । वस्तुतः चिन्तनरीत्या व्यवहारेण च जनस्य मूर्खत्वं ज्ञायते । अस्माभिः ज्ञानलवदुर्विदग्धेभ्यः सर्वदा दूरे एव भाव्यम् । भर्तृहरिः कथयति यत् जनः प्रयत्नपूर्वकं मकरमुखान्तर्गतं रत्नं निष्कासयितुमर्हति प्रचलदूर्मिमालायुतं समुद्रमपि सन्तर्तुमर्हति, भुजङ्गमपि पुष्पवत् शिरसि धारयितुमर्हति सिकतासु तैलं प्राप्तुमर्हति, मृगतृष्णासु जलमपि पातुमर्हति शशविषाणमपि आसादयितुमर्हति अर्थात् अशक्यमपि शक्यं कर्तुमर्हति परन्तु दुराग्रहग्रस्तस्य मूर्खस्य मानसं परिवर्तयितुं न कोपि प्रभवति । सर्वविधसमस्यानां निदानं शास्त्रेषु दर्शितं वर्तते । किन्तु मूर्खस्य मूर्खतायाः निदानं तत्राऽपि नास्ति। अनन्तशास्त्राणि अधीत्यापि कोपि मूर्खस्य समाधानं कर्तुं नार्हति । भर्तृहरिः अग्रे पुनः प्रतिपादयति यत् पावकः जलेन शमयितुं शक्यः, सूर्यातपः छत्रेण निवारयितुं शक्यः, मदमत्तः गजोऽपि तीक्ष्णाङ्कुशेन वशीकर्तुं शक्यः, गोगर्धभौ दण्डेन नियन्त्रयितुं शक्यौ, रोगाः औषधेन दूरीकर्तुं शक्याः, तीक्ष्णमपि विषं विविधैः मन्त्रैः अपाकर्तुं शक्यं, परन्तु लोके मूर्खजनस्य प्रतीकारः कथमपि न सम्भवति-

**चारित्र्यविकासे भर्तृहरेः अवदानम्**

**शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो**

**नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।**

**व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं**

**सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥'**

**विद्यायाः माहात्म्यम् -** मानवस्य विकासे विद्यायाः स्थानं प्रमुखं वर्तते । उन्नतं परिष्कृतं सफलं च जीवनं विधातुं ज्ञानम् परमावश्यकं भवति । ज्ञानेन विना विकासस्य कल्पना अपि अशक्या एव । विद्यया विना ज्ञानस्य नान्यः मार्गः । अद्यत्वे मानवेन कृतस्य बौद्धिकविकासस्य प्रमाण्यं नापेक्षितम् । चतसृषु दिक्षु आश्चर्यकराः वैज्ञानिकप्रयोगाः दृश्यन्ते । यातायातक्षेत्रे, रक्षान्यायचिकित्सादिक्षेत्रे, नवसर्जनादिविविधक्षेत्रेषु च जातं विकासं विलोक्य मानवजातौ गर्वानुभूतिः भवति । सर्वमिदं मनुवंशस्य विकसितबुद्धेः चमत्कारो विद्यते । मानवः बुद्धिविकासेन सार्थकत्वमवाप्य धन्यतां प्राप्नोति । तेन जगदिदं रमणीयात् रमणीयतरं ततः पुनः रमणीयतमञ्च जायते । मनुष्यतायाः परमं लक्ष्यं बुद्धेः विवेकस्य च विकासः एव विद्यते । बुद्धिविकासाभावे मानवः अन्यपशुः इव सास्नालाङ्गूलककुदखुरविषाणविहीनः पशुरेव भविष्यति । चिन्तनशक्तिकारणादेव मानवः इतरप्राणीभ्यः श्रेष्ठः भवति । चिन्तनशक्तेः बुद्धेः विवेकस्य च विकासः अस्माकं विद्याध्यवसायाधारितो भवति । उत्तमोत्तमग्रन्थानामध्ययनेनैव मानवः सततम् आन्तरिकं बाह्यञ्च विकासं साधयति । व्यक्तेः वैशिष्ट्यं, मानवतायाः गौरवं, सागरस्य सम्पूर्ण वैभवञ्च विद्यायामेव समाहितं वर्तते । इयं विद्या जन्मजन्मान्तरं यावत् सञ्चिता तिष्ठतीत्यत्र शास्त्रप्रमाणं विद्यते । लोके केचन जनाः स्वीयं सौन्दर्यं प्रभावञ्च वर्धयितुं बहुविधान् अलङ्कारान् धारयन्ति । भर्तृहरिदृष्ट्या सर्वाण्यप्यलङ्करणानि व्यर्थान्येव तात्कालिकत्वात् । 'सुन्दराणि केयूराणि, आकर्षकाः हाराः, महार्घाणि अङ्गरागाणि, सुगन्धितानि चन्दनादीनि द्रव्यानि सुप्रसाधिताः केशादयश्च जनान् नैव अलङ्कुर्वन्ति । लोकप्रसिद्धानि इमानि अलङ्करणानि कालक्रमेण नश्यन्ति । परन्तु जनैः स्वायत्तीकृता सुपरिष्कृता सुसंस्कृता वाणी सर्वतोभावेन तान् अलङ्करोति । ' एतादृशी वाणी विद्यया एव सम्भवति । अत एव भर्तृहरिः कथयति यत् विद्या मनुष्याणां सौन्दर्य, सुगुप्तं धनं, भोगैश्वर्ययशः प्रदायक, गुरूणामपि पूज्यं, विदेशे बन्धुतुल्यं, सर्वोत्तमं दैवतञ्च विद्यते । राजसु जनस्य प्रतिष्ठा विद्यया एव भवति न तु धनेन–

**विद्या नाम नरस्य रूपमधिकं प्रछन्नगुप्तं धनं**

**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।**

**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं**

**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥ '**

**सद्गुणमहिमा -** सतां सज्जनानां गुणाः सद्गुणाः इति कथ्यन्ते । लोके सज्जनानां व्यवहारः आदर्शभूतः श्लाघ्यश्च मन्यते । तेषां गुणाः अन्यैः अनुकरणीयाः भवन्ति । सद्गुणस्य महिमा भूयान् भवति । दयापरोपकारस्नेहादिगुणाः जनेषु भिन्नप्रमाणेन भवन्ति । कश्चिदपि जनः तस्मिन् विद्यमानगुणाधारेण आचरति । आचरणेनैव तस्य जनस्य चरित्रं ज्ञायते । सद्गुणयुतस्य सच्चरित्रस्य जनस्य प्रतिष्ठा सर्वत्र भवति । दुर्गुणयुतस्य च स्थानं क्वचिदपि न भवति । प्रभुत्वकारणाद् धनकारणाद् वा कालविशेषे स्थानविशेषे वा इच्छया अनिच्छया वा तस्य सम्माननं भवेन्नाम परन्तु कालानन्तरे सः अवमानितः भवत्येव। तस्मिन् न केपि विश्वसन्ति । परमात्मोपलब्धये भक्तये सुखशान्तिभ्यां च अस्माभिः अवश्यमेव सद्गुणाः अधिगन्तव्याः । भर्तृहरेः अनुसारेण कस्यचिदपि जीवस्य प्राणघातात् निवृत्तिः अन्यस्य धनहरणे संयमः सत्यभाषणं आवश्यकतायां सत्याम् सामर्थ्यानुसारेण सहकारप्रदानं परनारीविषयकचर्चासु मौनालम्बनं लोभस्य प्रशमनं गुरुषु विनम्रता सर्वप्राणिषु दया इत्येते गुणाः सर्वशास्त्रविहितं सार्वत्रिकं सार्वकालिकं मङ्गलकरञ्च मार्गं प्रशस्तीकुर्वन्ति –

**प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं**

**काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।**

**तृष्णास्त्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा**

**सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयषामेष पन्थाः ॥**

कर्मविचारः

भारतीयदर्शने पुरुषार्थचतुष्टयस्य मूलाधारः कर्म एव वर्तते। मानवः कर्मबलेन सर्वविधां सिद्धिं लभते । कर्म अकृत्वा न कोऽपि जनः अभीष्टं फलं प्राप्तुमर्हति । तत्तत्कर्मफलेनैव सज्जनाः सर्वदा प्रशंस्यन्ते दुर्जनाश्च निन्द्यन्ते । भगवता व्यासेन उक्तम्-

चारित्र्यविकासे भर्तृहरेः अवदानम्

**ना भुक्तं क्षीयते कर्म कल्पकोतिशतैरपि ।**

**अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥ '**

अयमेव सिद्धान्तः केनचित् कविना अधोलिखितरुपेण निरूपितः । पङ्क्तिरियं रामचरितमानसस्य विद्यते इति केचन ब्रुवन्ति । किन्तु परिशीलनेन ज्ञातं यत् मानसे क्वापि आसाम् उल्लेखः नास्ति । परञ्च भावस्त्वत्र अतीव स्फुटः वर्तते-

**कर्म प्रधान विश्व रचि राखा । जो जस करहिं सो तस फल चाखा ॥**

**सकल पदारथ हैं जग मांही। कर्महीन नर पावत नाही ।।**

कर्त्तव्यरूपकठोरमार्गे प्रयाणेनैव जीवनं सुवर्णायते । वस्तुतः अस्माभिः स्वीयं कर्म एव नियन्त्रयितुं परिष्कर्तुं वा शक्यते न तु तस्य फलम् । यतः फले कस्यचिदपि अधिकारः नैव भवति । श्रीमद्भगवद्गीतायामपि उक्तम्-

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**

आचार्यः भर्तृहरिरपि कर्मणः माहात्म्यं विस्तरेण प्राकटयत् । तन्मतेन 'विधाता अपि जनस्य कर्मानुसारेणैव फलं ददाति । सोऽपि कर्मातिरिच्य फलं कस्मैचित् न ददाति । यतः विधाता कर्मणः अपेक्षया बलवान् नास्ति । " 'कर्मणा एव सम्पूर्णं जगदिदं नियन्त्र्यते। तेनैव ब्रह्मा ब्रह्माण्डभाण्डोदरे कुलालवत् नियमितः, विष्णुः दशावतारगहने महासङ्कटे क्षिप्तः, रुद्रः कपालपाणिपुटके भिक्षाटनं कारितः, सूर्यश्च नित्यमेव गगने भ्राम्यते । " 'हे बन्धो ! सत्क्रियारूपी भगवती तत्क्षणमेव खलान् साधून्, विदुषः मूर्खान्, द्वेषिणः हितान्, परोक्षं प्रत्यक्षं विषञ्च अमृतं कुरुते । तस्मात् तां देवीम् आराधय, व्यसनैः विपुलेषु गुणेषु वृथा आस्थां मा कुरु । " 'पुंसां बुद्धिरपि कर्मानुसारिणी एव भवति, अतः बुद्धिमद्भिः सततं कर्मणः फलविषये चिन्तनं विधाय सुविचार्य च कर्म कर्त्तव्यम्" अन्यथा त्वरया अविवेकेन च कृतानां कर्मणां परिणामः यावज्जीवं हृदयसन्तापकारी भवति-

गुणवदगुणवद्वा कुर्वता कार्यमादौ परिणतिरवधार्यायत्नतः पण्डितेन ।

**अतिरभसकृतानां कर्मणामाविपत्तेर्भवति**

**हृदयदाही शल्यतुल्यो विपाकः ॥**

संस्कृतसाहित्ये चारित्र्यविकासार्थं मार्गदर्शनस्य प्राचुर्यं विद्यते । काव्येषु विशेषतया नाटकेषु च सदाचारपूरितानि अनेकानि तथ्यानि समुपलभ्यन्ते । अन्यत्रापि नैयून्यं नास्ति। परन्तु भर्तृहरेः नीतिशतके एकत्र मनुस्मृतिसदृशी शिक्षा, महाभारतसदृशोपदेशः, पुराणसदृशरसास्वादनं दर्शनसदृशतर्कशीलता दृश्यते, अपरत्र कालिदासस्योपमा, दण्डिनः पदलालित्यं, भारवेः अर्थगाम्भीर्यञ्च समुपलभ्यते । नीतिशतकं मानवमात्रस्य कृते मधुरम् औषधं वर्तते । आबालवृद्धाः सर्वेऽपि विना कष्टं आनन्देन अस्य पानं कर्तुं प्रभवन्ति । कविवरेण भर्तृहरिणा नीतिशतकमाध्यमेन विशिष्टमेकं जीवनदर्शनं प्रदत्तम् । अस्य पद्यानि प्रतिपदमस्मान् प्रहरीत्वेन प्रबोध्य योग्यमार्गमानीय दिव्यं भव्यञ्च जीवनं जीवितुं प्रेरयति । अनेन मानवः किंकर्त्तव्यविमूढदशायामपि सरलं सुगमं च मार्गं प्राप्नोति । ग्रन्थोऽयं न केवलं संस्कृतज्ञानाम् अपितु सर्वेषां प्रियतमं कण्ठाभरणं विद्यते। अयं छात्राणां ब्रह्मचारीणां संन्यस्तानां गृहस्थानां

जैनबौद्धादीणां तदितरेषाञ्च कृते समानरूपेण मार्गदर्शनं विधाय तान् तान् उन्नते: उत्तुङ्ग शिखरं प्रापय्य पारस्परिकं प्रेमभावं पुष्णाति । एतद्द्वारा जन: स्वीयं दायित्वमवगत्य कर्त्तव्यपरायण: भवति। तेन च चारित्र्यविकासपुरस्सरं समाजस्य देशस्य राष्ट्रस्य विश्वस्य च विकास साधयितुमर्हति ।

**सन्दर्भग्रन्था:**


1. काव्यप्रकाशे का. 2
2. भर्तृ. नीति. 10
3. उ. रा.च. 217
4. भर्तृ. नीति. 28
5. तत्रैव 75
6. रा.च.मा.सु.का. 4
7. भर्तृ. नीति, - 11
8. तत्रैव - 19
9. तत्रैव 20
10. तत्रैव - 26
11. ब्रह्मवैवर्त प्रकृति. अ. 37
12. अज्ञातम्
13. श्रीमद्भगवद्गीता - 2/7
14. भर्तृ. नीति. -88
15. तत्रैव - 89
16. तत्रैव - 90
17. तत्रैव - 92